Postal Regd.No. GAMC- 1553/2019-2021
ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १३ अङ्क : १५२
जान्युआरी - २०१९

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

### प्रियजनस्य प्रतीक्षा

रावण: तापसवेषेण सीताया: अपहरणं कृतवान् । अपरपक्षे रावण: सीताया: पुरत: निष्कपटं वक्तुम् अशक्ष्यत् यत् 'सीते ! अहं त्वयि स्निह्यामि । त्वम् उचितं कुरु ।' यदि सीता तस्य निवेदनस्य स्वीकारम् अकरिष्यत् तर्हि अपहरणं न अभविष्यत् । कृष्ण: रुक्मिणीं हृतवान् । रुक्मिणी अपि कृष्णेन सह पलायितुं सज्जा आसीत् । अत: तत् उपर्युक्ते अर्थे अपहरणं न उच्यते । सीतया प्रत्याख्यात: (अस्वीकृत:) विषण्णवदन: रावण: अपि पर्णकुटिं त्यजन् निवेदयितुम् अशक्ष्यत् यत् 'सीते ! त्वां पराङ्मुखीं जानन् अहं प्रतिगच्छामि । परन्तु अहं ननु आजीवनं तव प्रतीक्षां करिष्यामि ।' स्नेहे हठाग्रह: स्थातुं न शक्नोति । स्नेह: पृथिव्यां प्ररूढा काचित् पवित्रा घटना अस्ति । सा सदैव अनिन्दनीया । परन्तु तत्रत्या अप्रतीक्षा रावणवृत्ति: अस्ति ।

पृथ्वीराज: विवाहमण्डपे आक्रमणं कृत्वा संयुक्ताया: हरणं कृतवान् । अत्रापि संयुक्ता पृथ्वीराजं प्रतीक्षते स्म । तस्मिन् काले स्त्रिया: इच्छया कृतं सपराक्रमं हरणं प्रशस्यम् आसीत् । प्रतीक्षालिप्तं प्रेम पवित्रम् अस्ति । एवम् उक्ते व्यभिचारस्य पक्षपात: नास्ति । प्रेमतत्त्ववञ्चित: काम: व्यभिचार: अस्ति । तादृश: काम: दम्पत्यो: भवेत् चेदपि स: प्रच्छन्न: व्यभिचार: एव ।

य: मनुष्य: कदापि प्राकृतिकम् आकर्षणं न अनुभवति तस्य जीवितं विशिष्टं नास्ति, विपरीतम् अस्ति । प्रगाढम् आकर्षणं प्रकृते: संरचनाया: मधुरं गुञ्जनम् अस्ति । अपि च एतादृशम् आकर्षणम् अनुभवन्तौ द्वौ प्रियजनौ यत्र मिलत: तत्र मन्दिरस्य रचना स्वयमेव भवति । आकर्षणम् अश्लीलं नास्ति, परन्तु दम्भेन आच्छादितं ब्रह्मचर्यम् अश्लीलम् अस्ति ।

कश्चित् वृद्ध: प्रतिसायं नगरपालिकाया: उद्यानं गत्वा एकाकी उपविशति । एकाकित्वस्य पीडा तस्य नेत्रयो: दृश्यते । तस्मिन् एव उद्याने नातिदूरे लतामण्डपे शून्यताया: शापेन पीडिता इव काचित् वृद्धा अपि उपविशति । अथ वयं किं कर्तुं शक्नुम: ? वयं परस्परम् अपरिचितयो: द्वयो: वृद्धयो: मेलनार्थं सामाजिकम् आनुकूल्यं रचयितुं शक्नुयाम चेत् तत् महत् पुण्यकरम् ।

जगति प्रतिपदं नूतना चिकित्सापद्धति: आविर्भवति । परन्तु सर्वासां चिकित्सानां स्नेहचिकित्सा विशिष्यते । तत्रापि प्रियजनस्य प्रतीक्षाकाले गलितम् अश्रुजलं गङ्गाजलात् अपि पवित्रम् अस्ति ।

✍ सतीश: गज्जर्

# यात्रिकः



जेन्द्रपुरस्य सीमायां काचित् जीर्णा धर्मशाला आसीत् । निरन्तरवृष्टितः आत्मनः रक्षणाय केचन एकैकशः तत्र आगताः । तेषु उभौ युवकौ । तृतीयः आसीत् कश्चन वृद्धः । तस्य दीर्घं श्वेतश्मश्रु आसीत् । चतुर्थः आसीत् कश्चन युवकः । तस्य दर्शनात् भासते स्म यत् एषः श्रमस्य अनिच्छुः सुखाभिलाषी तरुणः इति ।

निद्रा शीघ्रं न प्राप्ता इत्यतः तौ तरुणौ सम्भाषणम् आरब्धवन्तौ । वृद्धः तु वृष्टिं पश्यन् क्षीणस्वरेण किमपि गायति स्म । सुखाभिलाषी तरुणः पादौ प्रसार्य काकनिद्रासुखम् अनुभवति स्म ।

तौ युवकौ वार्तालापात् परस्परपरिचयं प्राप्तवन्तौ । तयोः एकस्य नाम आनन्दः । अपरस्य नाम सुनन्दः इति ।

"भवान् कुत्रत्यः ? कुतः आगतम् ? कुत्र गम्यते भवता ?" इति आनन्दम् अपृच्छत् सुनन्दः ।

"अहं राघवेन्द्रपुरीयः । मद्देशे मया लघुः उद्योगः अपि कोऽपि न प्राप्तः । ये अधिकारिणां धनिकानां वा बान्धवाः भवन्ति तैः एव उद्योगः प्राप्यते तत्र । अल्पस्य उद्योगस्य निमित्तम् अपि सामान्यैः प्रभूततया उत्कोचः दातव्यः भवति । अहं तु अकिञ्चनः । अतः मया कथम् उद्योगः प्राप्येत तत्र ? मया श्रुतं यत् राजेन्त्रपुरे योग्यतानुगुणः उद्योगः प्राप्यते इति । अहं संस्कृते गणितशास्त्रादिषु च प्रवीणः अस्मि । अतः अत्र कुत्रचित् अध्यापकोद्योगः प्राप्येत इति विचिन्त्य अहम् अत्र आगतः । तदस्तु, भवान् कुतः आगतः ? कुत्र वा गम्यते भवता ?" इति अपृच्छत् आनन्दः ।

एतत् श्रुत्वा सकृत् हसित्वा अवदत् सुनन्दः– "दूरतः पर्वतो रम्यः इति वचनं सत्यम् एव । भवतः या स्थितिः सा एव स्थितिः ममापि । अहम् एतद्देशवासी एव । खड्गयुद्धे अश्वचालने च अहं दक्षः अस्मि । तथापि सामान्यः सैनिकोद्योगः अपि मया अत्र न प्राप्तः । मया भवतः देशस्य प्रशंसा श्रुता । योग्यतानुगुणं तत्र उद्योगः प्राप्यते इति श्रुत्वा अहं भवद्देशं प्रति प्रस्थितः । किन्तु भवतः कथनात् ज्ञायते यत् आवाभ्यां यत् श्रुतं तत् सर्वथा मिथ्या इति । मिथ्याप्रचारं श्रुत्वा आवां वञ्चितौ जातौ" इति ।

"देशद्वये अपि एवं मिथ्याप्रचारं के कुर्वन्तः स्युः ? तेषाम् उद्देशः कः स्यात् ? एतेन किं वा प्रयोजनम् तेषाम् ?" इति अवदत् आनन्दः ।

वृद्धः तयोः सम्भाषणं शृण्वन् आसीत् । सः तौ अवदत् – "एतस्य उत्तरम् अहं जानामि । मया विविधेषु

## गोविन्दस्य क्षेत्रम्

मूलम् - गोविन्दनुं खेतर ( गुजराती ) लेखकः - धूमकेतु, (सं. अनु. ) नीतिनाचार्यः

( अनुवर्तते )

"किं गोविन्दभ्रातः परिचयः अस्ति वा ?" नरहरः इदानीम् एतं कृषकं पश्यन् अस्ति। अस्ति अयं ग्रामीणः किन्तु मुखे तस्य उपकर्तुः लक्षणानि दृश्यन्ते। कस्यचित् मुखं दृष्ट्वा तस्य लक्षणानाम् उहा कर्तव्या - एतत् नरहरस्य दृष्टौ एव नासीत्। सः तथा अनुभवी अपि नासीत्। सः गोविन्दं वदति - "कदाचित् एते राजपुरस्य जनाः सन्ति।"

गोविन्दः उभौ निरीक्ष्य उत्थातुं यत्नवान् अवदत् च - "अहो पितृकल्पः काका। कल्याण-पटेल आयान्तु, आयान्तु, कथं विस्मरानि भवन्तम् ?"

तावत् नारणः भट्टः ब्राह्मणः स्वकीयम् उत्तरीयम् अधः स्थापयित्वा अग्रे अगच्छत्। अरे गोविन्द मम पुत्र ! तव एतादृशी स्थितिः। अरे बहु रुग्णः जातः असि ? नरहरः सर्वेषां वार्तालापं दृष्ट्वा शनैः गृहात् बहिः निर्गतः। नगरे प्रतिवेशिधर्मः समाप्तः जायते।

"पितृव्य !" गोविन्दस्य नेत्रयोः अश्रूणि आसन् - "इदानीं मम पुत्रं पश्यतु। अस्य योगक्षेमादिकं सर्वं भवतां हस्ते।"

"अरे किं प्रमत्तः असि वा ?" विप्रः वदति अरे कल्याण-पटेल ! आगच्छतु। अत्र गोविन्दस्य समीपम् आगच्छतु।

कल्याण-पटेलः अग्रे आगच्छत्। निर्दोषः कृषकः अयम् आनीतं धनस्यूतम् अग्रे करोति। पश्यतु गोविन्दभ्रातः भवद्भिः तु भूमेः धनव्यवहारः न पृष्टः किन्तु विप्रस्य धनं स्वीकृत्य अस्माभिः द्वितीयः अवतारः ग्रह्णीयः तस्य ऋणमुक्तये। एतत् भवतां भागस्य धनम्। स्वीक्रियताम्।"

अपरेद्युः सर्वैः सम्भूय चर्चा कृता। निर्णयः जातः गोविन्देन सकुटुम्बं नगरं विहाय पुनः राजपुरे निवासः आरब्धव्यः। गोविन्दः कार्यालयं गत्वा अवकाशम् अयाचत। कार्यालयस्य मुख्याधिकारी वक्री भूत्वा अवदत् - "इदानीं तु कार्यभारः अस्ति। अवकाशः अशक्यः"

"किन्तु महोदाय ! अयं तु मम जीवनमरणयोः प्रश्नः अस्ति"

"जीवनस्य अपेक्षया कार्यम् एतत् प्रामुख्यं भजते। अवकाशः नैव नैव"

निराशः गोविन्दः गृहं प्रत्यागच्छत्। "कार्यालयाधिकारी मम नाम निष्कासयिष्यति"

"किमुक्तम्" नारणभट्टः अनवगत्य पृष्टवान्।

"सेवात्यागः भविष्यति"

"सेवात्यागः भविष्यति तावदेव ?"

"आम्"

"तर्हि वत्स ! एहि चलामः तावत् राजपुरं प्रति।" भवतः पञ्च मुख्याधिकारिणः तत्र ग्रामे पोषिताः भवेयुः तावत् कृषिः क्षेत्रे अस्ति। यावत् भूमिमाता प्रसन्ना विद्यते तावत् नान्यः चिन्तायाः विषयः। इतोऽपि गोविन्दस्य मस्तके द्वैतं प्रचलति। नगरे स्थातव्यम् उत ग्रामः गन्तव्यः। एकत्र केवलं यान्त्रिकं जीवनं वर्तते अपरत्र ग्रामे सम्पूर्णं स्वाधीनं-स्वतन्त्रं जीवनम्। ते सर्वे पुनः गोविन्दम् आराध्य निश्चयम् अकारयन् यत् इदानीं राजपुरग्रामः एव श्रेयः।

( क्रमशः )

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## संस्कृत-सम्भाषण-वर्गः
### प्रथमः स्तरः

- **Date** : 4/3/19 to 31/5/19
- **Day** : Monday-Wednesday-Friday
- **Time** : 6:30 pm to 8:00 pm
- **Fees** : 3000/-
- **Venue** : Eklavya Sanskrit Academy
Core House,
Opp. Apollo city centre
Nr. Parimal Garden,
Ahmedabad - 380006
- **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

संस्कृत-साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## वेदपाठः ( निश्चितांशः )

**Date** : 2/1/19 to 29/3/19
**Day** : Wednesday- Friday
**Time** : 6.30pm to 8.00pm
**Fees** : 3000/-

## छन्दःपरिचयः

**Date** : 1/2/19 to 28/2/19
**Day** : Thursday - Friday
**Time** : 6.30pm to 8.00pm
**Fees** : 2000/-

## मार्गदर्शनम् (Class 10)
## ( व्याकरणम् )

**Date** : 16/01/19 to 26/01/19
**Day** : Daily
**Time** : 11:00 am to 12:30 pm
**Fees** : 2000/-

**Venue:** Core House, Off CG Road, Ah'bad
**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006